# सुन्दरकाण्ड चतुस्त्रिंशः सर्गः (३४) - क्षेमवृत्तान्त कथनम्

तस्यास् तद्वचनं श्रुत्वा हनुमान् हरि यूथपः ।
दुःखाद् दुःखाभि भूतायाः सान्त्व मुत्तर मब्रवीत् ॥ १ ॥

अहं रामस्य सन्देशाद् देवि दूतस् तवागतः ।
वैदेहि कुशली रामस् त्वां च कौशल मब्रवीत् ॥ २ ॥

यो ब्राह्म मस्त्रं वेदांश्च वेद वेदविदां वरः ।
स त्वां दाशरथी रामो देवि कौशल मब्रवीत् ॥ ३ ॥

लक्ष्मणश्च महातेजा भर्तुस्तेऽनुचरः प्रियः ।
कृतवान् शोक सन्तप्तः शिरसा तेऽभिवादनम् ॥ ४ ॥

सा तयोः कुशलं देवी निशम्य नरसिंहयोः ।
प्रीति संहृष्ट सर्वाङ्गी हनुमन्त मथाब्रवीत् ॥ ५ ॥

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा ।
एति जीवन्त मानन्दो नरं वर्ष शतादपि ॥ ६ ॥

तया समागते तस्मिन् प्रति रुत्पादिताऽद्भुता ।
परस्परेण चालापं विश्वस्तौ तौ प्रचक्रतुः ॥ ७ ॥

तस्यास् तद् वचनं श्रुत्वा हनुमान्हरियूथपः ।
सीतायाः शोकदीनायाः समीपमुपचक्रमे ॥ ८ ॥

यथा यथा समीपं स हनुमा नुपसर्पति ।
तथा तथा रावणं सा तं सीता परिशङ्कते ॥ ९ ॥

अहो धिग् दुष्कृत मिदं कथितं हि यदस्य मे ।
रूपान्तर मुपागम्य स एवायं हि रावणः ॥ १० ॥

तामशोकस्य शाखां सा विमुक्त्वा शोक कर्शिता ।
तस्या मेवानवद्याङ्गी धरण्यां समुपाविशत् ॥ ११ ॥

हनुमानपि दुःखार्तां तां दृष्ट्वा भयमोहिताम् ।
अवन्दत महाबाहुस् ततस् तां जनकात्मजाम् ॥ १२ ॥

सा चैनं भयवित्रस्ता भूयो नैवाभ्युदैक्षत ।
तं दृष्ट्वा वन्दमानं तु सीता शशि निभानना ॥ १३ ॥

अब्रवी द्दीर्घ मुच्छ्वस्य वानरं मधुर स्वरा ।
मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयम् ॥ १४ ॥

उत्पादयसि मे भूयः सन्तापं तन्न शोभनम् ।
स्वं परित्यज्य रूपं यः परिव्राजक रूप धृत् ॥ १५ ॥

जनस्थाने मया दृष्टस् त्वं स एवासि रावणः ।
उपवास कृशां दीनां कामरूप निशाचर ॥ १६ ॥

सन्तापयसि मां भूयः सन्तप्तां तन्न शोभनम् ।
अथवा नैतदेवं हि यन्मया परिशङ्कितम् ॥ १७ ॥

मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ।
यदि रामस्य दूतस्त्वमागतो भद्रमस्तु ते ॥ १८ ॥

पृच्छामि त्वां हरिश्रेष्ठ प्रिया रामकथा हि मे ।
गुणान्रामस्य कथय प्रियस्य मम वानर ॥ १९ ॥

चित्तं हरसि मे सौम्य नदीकूलं यथा रयः ।
अहो स्वप्नस्य सुखता याहमेवं चिराहृता ॥ २० ॥

प्रेषितं नाम पश्यामि राघवेण वनौकसम् ।
स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम् ॥ २१ ॥

पश्येयं नावसीदेयं स्वप्नोऽपि मम मत्सरी ।
नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम् ॥ २२ ॥

न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम ।
किं नु स्याच्चित्तमोहोऽयं भवेद्वातगतिस्त्वियम् ॥ २३ ॥

उन्मादजो विकारो वा स्यादियं मृगतृष्णिका ।
अथवा नाय मुन्मादो मोहोऽप्युन्माद लक्षणः ॥ २४ ॥

सम्बुध्ये चाहमात्मानमिमं चापि वनौकसम् ।
इत्येवं बहुधा सीता सम्प्रधार्य बलाबलम् ॥ २५ ॥

रक्षसां कामरूप त्वान् मेने तं राक्षसाधिपम् ।
एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा ॥ २६ ॥

न प्रतिव्याजहाराथ वानरं जनकात्मजा ।
सीतायाश् चिन्तितं बुद्ध्वा हनुमान् मारुतात्मजः ॥ २७ ॥

श्रोत्रानु कूलैर् वचनैस् तदा तां सम्प्रहर्षयत् ।
आदित्य इव तेजस्वी लोक कान्तः शशी यथा ॥ २८ ॥

राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा ।
विक्रमेणोप पन्नश्च यथा विष्णुर् महायशाः ॥ २९ ॥

सत्यवादी मधुरवाग् देवो वाचस्पतिर् यथा ।
रूपवान् सुभगः श्रीमान् कन्दर्प इव मूर्तिमान् ॥ ३० ॥

स्थान क्रोधः प्रहर्ता च श्रेष्ठो लोके महारथः ।
बाहुच्छाया मवष्टब्धो यस्य लोको महात्मनः ॥ ३१ ॥

अपकृष् याश्रम पदान् मृग रूपेण राघवम् ।
शून्ये येनापनीतासि तस्य द्रक्ष्यसि यत्फलम् ॥ ३२ ॥

न चिराद्रावणं सङ्ख्ये यो वधिष्यति वीर्यवान् ।
रोष प्रमुक्तै रिषुभिर् ज्वलद्भि रिव पावकैः ॥ ३३ ॥

तेनाहं प्रेषितो दूतस् त्वत् सकाश मिहागतः ।
त्वद् वियोगेन दुःखार्तः स त्वां कौशल मब्रवीत् ॥ ३४ ॥

लक्ष्मणश्च महातेजाः सुमित्रानन्द वर्धनः ।
अभिवाद्य महाबाहुः स त्वां कौशल मब्रवीत् ॥ ३५ ॥

रामस्य च सखा देवि सुग्रीवो नाम वानरः ।
राजा वानर मुख्यानां स त्वां कौशल मब्रवीत् ॥ ३६ ॥

नित्यं स्मरति रामस्त्वां ससुग्रीवः सलक्ष्मणः ।
दिष्ट्या जीवसि वैदेहि राक्षसी वश मागता ॥ ३७ ॥

न चिराद् द्रक्ष्यसे रामं लक्ष्मणं च महाबलम् ।
मध्ये वानर कोटीनां सुग्रीवं चामि तौजसम् ॥ ३८ ॥

अहं सुग्रीव सचिवो हनुमान् नाम वानरः ।
प्रविष्टो नगरीं लङ्कां लङ्घयित्वा महोदधिम् ॥ ३९ ॥

कृत्वा मूर्ध्नि पदन्यासं रावणस्य दुरात्मनः ।
त्वां द्रष्टु मुपयातोऽहं समाश्रित्य पराक्रमम् ॥ ४० ॥

नाहमस्मि तथा देवि यथा मामव गच्छसि ।
विशङ्का त्यज्यता मेषा श्रद्धत्स्व वदतो मम ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥